॥कात्यायनीतंत्रोक्तचंडीपूजनविधिः।पत्र२६॥

॥श्रीगणेशायनमः॥ ॥कात्यायनीतंत्रोक्तप्रयोगलिख्यते॥
ॐअस्य॥अस्याशापोद्धारोत्कीलनेकात्यायनीतंत्रोक्तेत्रयोदशा
ध्यायंपठित्वाप्रथमंपठेत्॥ततोद्वादशद्वितीयौततएकादशतृ
तीयावितिक्रमेणपठेत्॥ततोदशमचतुर्थौततोनवमपंचमौत
तोष्टमषष्ठौततःसप्तमंद्विरिति॥शापोद्धारःप्रथमंमध्यमचरित्रं
पठित्वाततःप्रथमतृतीयेपठेत्॥इत्युत्कीलनं॥इतिकेरलाः॥
अथप्रसंगात्स्तोत्रपाठविधिः॥तत्रवाराहीतंत्रे॥आधारेस्थाप १
यित्वातुपुस्तकंवाचयेत्ततः॥हस्तसंस्थापनाद्देवीनवेदर्द्धफलंल

तः॥ यावन्न पूर्यते ध्यायस्तावन्न विरमेत्पठेत्। यदि प्रमादादध्या
ये विरामो भवति प्रिये। पुनरध्यायमारभ्य पठेत्सर्वं मुहुर्मुहुः॥
अनुक्रमात्सर्वदेहे विशिरःकंपादिकं त्यजेत्॥ प्रणवं पूर्वमुच्चार्य
स्तोत्रं वा संहितां पठेत्। अंते च प्रणवं दद्यादित्युवाचादिपूरुषः॥
नमानसं पठेत्स्तोत्रं वाचिकं तु प्रशस्यते। मनुकीलके। शनैस्तुज
प्यमानेस्मिन्स्तोत्रे संपत्तिरुच्चकैरिति॥ तद्युत्कच्चैः पाठनिषेधकं
च। पुस्तके वाचनं शास्त्रं सहस्राद्धिकं यदि॥ ततो न्यूनस्य तु भवे
द्वाचनं पुस्तकं विना॥ ऋषिछंदोंगं विन्यस्य पठेत्स्तोत्रं समाहितः॥

स्तोत्रे न ह्रस्यते यत्र प्रणवन्यासमाचरेत्। अर्द्धेनाचलचित्तेन पारि
तुष्यं प्रयत्नतः॥ न स्वयं लिखितं स्तोत्रं नाब्राह्मणलिपिं पठेत्। न च
स्वयं कृतं स्तोत्रं तथान्येन च यत्कृतं॥ यतः कलौ प्रशंसंति स्म विनि
र्माणितं तु यत्। अर्गलं कीलकं चादौ पठित्वा कवचं पठेत्। जपेत्स
प्तशतीं पश्चात्क्रम एष शिवोदितः॥ इति केरलसंप्रदायः॥ अत्र रा
त्रिसूक्तं देवीसूक्ते वैदिके इति केचित्। रात्रिसूक्तं प्रथमाध्याय
स्थं विश्वेश्वरीसूक्तं। देवीसूक्तं नमो देव्या इत्यादि पंचमाध्यायस्थ
मित्यपरे॥ अन्योपि प्रकारस्तंत्रोक्तः॥ कृष्णाष्टमी समारभ्य यावत्कृ २

ल्लच्चतुर्दशी।दृष्ट्वैकोत्तरयाज्ञाप्यंपूर्वसंपुटितंडयत्।एवंदेवीम
याप्रोक्तःपुरश्चरणक्रमः॥तदंतेहवनंकुर्यात्सतिस्रोकेनपा
यसैः।प्रतिस्रोकेतिकात्यायनीतंत्रोक्तमंत्रोपलक्षणं।रात्रिसू
क्तंप्रतिऋचंतथादेव्याश्चसूक्तकं।षष्ठाष्टसंख्यंप्रत्यृचमुक्तंमं
त्रोपलक्षणं।कृत्वांतेप्रजपेत्स्तोत्रमाहोहृज्ञादिकंमुने।समुदाये
सूक्तव्यवहारस्यलक्ष्मीतंत्रेक्तत्वात्तदवयश्लोकाएवात्रलक्ष्य
तिबोध्यंप्रत्यृचमित्यत्राप्युक्तः।शेषेबोध्यःप्रपरस्त्वा।अथातःसं
प्रवक्ष्यामिनवरात्रिविधानकं।जपेदेकोत्तरांवृद्धिंदिनानिनवसं

ख्यया ॥१॥ एवोक्तेनैव विधिना पूजां कृत्वा प्रयत्नतः । नवाक्ष
रविधानेन संपूज्याथ विचक्षणः ॥२॥ सहस्रं प्रजपेन्मंत्रं प्रत्ये
कंच यथाविधि । मध्ये चैकोत्तरां वृद्धिं जपेद्देव्याः स्तवं मनुं ॥३॥ कृ
त्वा दशांशतो होमं तत्र सिद्धिं समाप्नुयात् ॥ अपरश्च ॥ जपेद्दिव्यं
समाश्रित्य समासमेकं तु यो नरः । कृत्वा बिल्वदलैर्मांसं मधुरत्र
ययोगतः ॥४॥ कृत्वा दशांशतो वापि कमलैः क्षीरसंयुतैः । धन
देन समाल्लक्ष्मीं प्राप्नुयादुत्तमां ध्रुवं ॥५॥ रुद्रगौरीतंत्रे ॥ श्रीका
मः पुष्टिकामो वा सृष्टिमार्गक्रमेण तु । जपेच्छक्त्यादिमारभ्य सर्वं ३

नदेत्यवधावधि। आदिमास्न्यप्रजपेत्सग्राछिपंसमापयेत्

शांत्यादिकामःसर्वत्रस्थितिमार्गक्रमेणतु॥७॥ब्राह्मणद्वाराक

रणेतुदक्षिणाविशेषतउक्तस्तत्रैव॥पंचस्वर्णंशिनाहस्रेदशाह

स्रेतुतत्त्रयं।पंचाहस्रेत्रिस्वर्णमेकंत्रिराहस्रे५तदर्द्धकं॥८॥एका

हस्रेपादमेकंदद्याद्वाशक्तितोबुधः॥इतिशताहस्याद्दौकाम्ना

नेदत्तक्तोवाराहीतंत्रे॥कृतेत्वमदीपितेवक्ष्योतिलधान्यादि

तंडुलान्।धर्मार्थिकामसंहृद्धौमोक्षार्थीमायसंकुनेत्॥थेमा

रणेमोहनेचैवतथोच्चाटनकर्मणि।कुम्भेन्मासंत्रिमधर्कमो

ह्नेम धुपायसं ।१०। स्तंभनेमातुलफलं वश्ये तु सितसर्षपान् ।
धर्मार्थकाममोक्षार्थं हूं धशिः निमुखोकुमेव ।।११।। मोहनेमारणे
चैव कुनेवै दक्षिणामुखः उच्चाटने उत्तरास्य इत्याह भगवान्भै
वः ।।१२।। क्रोडतंत्रे। प्रत्येकावर्त्तनं देविऽयमेधेन संमितं। निरा
हारान्नेकामान्संचाहत्यारिपुंजपेत् ।।१३।। इति सर्वेष्टसिद्धिः
।। कात्यायन्यै विद्महे कंन्यकुमारि धीमहि। तन्नो दुर्गा प्रचोद
यात् ।। इत्येषगायत्री यजुर्वेदः। अथ प्रयोगांतरं कात्यायनी
तंत्रे। ध्वांक्षि षोडशांगुलमितं चतुरंगुलोन्नतं स्थंडिलं कृत्वा

तत्र शुद्धगोघृतेनैकस्मिन्पात्रे रुद्रवर्त्तिकत्रयोदशदीपान्॥ प्र
ज्वाल्य दीपेषु प्रथमदीपे प्रथमाध्यायदेवनामावाहनासनपाद्या
दि गंधदानांतां पूजां कृत्वा पुष्पसमर्प्पणसमये वक्ष्यमाणैर्न
वभिः प्रतिश्लोकं पुष्पाणि समर्प्पयेत्॥ ततः प्रथमाध्यायसमा
प्तौ वक्ष्यमाणनवभिः श्लोकैः प्रतिश्लोकं पुष्पाणि समर्प्य धूप
दीपौ दत्वा पायसं नैवेद्यं दत्वा तांबूलं दक्षिणां च दत्वा नीराज्यै
कं ब्राह्मणं सुवासिनीं कुमारीं च भोजयेत्॥ संकल्पयेद्वा॥१॥
एवं तत्तदध्यायदेवनामावाहनादि ब्राह्मणभोजनांतं प्रत्यध्या

यंकुर्यात्॥ अनेनमन्त्रेणनैवेद्यादिनिर्माल्यपूजा॥ अनुग्रहदेहवर्ता
केसमाप्तिः॥ निग्रहेऽपारान्के॥ श्लोकास्तु॥ विश्वेश्वरींजगद्धात्रीं १
स्तुत्वासुरैः सर्वमनीष्टसंश्रयात् करोतुसानः शुभहेतुः २ यासां
प्रतंचोद्धतदैत्यतापितैः करोतुसानः ३॥ याचस्मृतातत्क्षणमेवहंति
नः करोतुसानः ४॥ सर्वाबाधाप्रशमनं ५॥ अन्नवैरिनाशनमित्यत्र
रोगनाशनमित्याद्यूह्यः॥ एवंदैत्यतापितैरित्यत्रापि ५ सर्वमंगल
मंगल्ये ६ सृष्टिस्थितिविनाशानां ७ शरणागतदीनार्त्त ८ सर्व
स्वरूपेसर्वेशे ९॥ एतेनुग्रहेनवश्लोकाः वक्ष्येतुविशेषः ॐ क्लीं रक्ष ५

चामुंडे कुरु कुरु अमुकं मे वशमानय स्वाहा ॥ अनेन प्रत्याध्या
यमाद्यंतयोः पूजां सर्वांति अयुतमंत्रजपः अयुतहोमश्च ॥ हो
मयेत्कटुतैलेन रक्तचंदनराजिकाः ॥ सहस्राहुतिमात्रेण रा
जानं वशमानयेत् ॥ मधुनाशोकपुष्पं च रात्रौ हुत्वा तु पूर्ववत् ॥
चक्रवर्त्तीनि वेदस्य चंडीमंत्रप्रभावतः ॥ अंते शतं ब्राह्मणाश्च
कुमार्यश्च भोजनीयाः ॥ धनार्थे बिल्वपत्रैः पूजा वश्यार्थे करवीर
पुष्पैरुपास्तुं कुमैर्वा पुत्रार्थं तुलसीदलैः पुष्पार्थं पंकजैः ॥ महा
कार्यार्थे प्रयोगे तु षोडशमाषैः स्वर्णमूर्तिं सलाकलशस्थापनं

कृत्वा तदग्रे घंटार्गलयंत्रे षट्कोणयंत्रे वा दीपं संस्थापयेत्॥ यंत्र
मंत्रसर्वसाधारणं॥ महतिकार्ये ऊनपंचाशद्दिनानि मध्ये चतुर्विं
शतिः॥ तदर्द्धमन्ये॥ एवमेव स्वर्णमूर्त्तिप्रमाणमपि बोध्यं ब्राह्मणा
स्त्रयो महत्कार्ये प्रयोगकर्त्तारः॥ अन्ये त्वेकः॥ नियद्देतु॥ सर्वबाध
प्रशमनमित्यस्याग्रे एवमुक्त्वा समुत्पत्स्ये इति पठेत्॥ अत्र प्रयोगे क
श्चित्तर्पणमप्युक्तं॥ त्रयोदशपात्राणि दुग्धेनापूर्याद्विंतयोः पुष्पांजलिं ण
दत्वा प्रतिश्लोकं प्रथमाध्यायदेवतां तर्पयामीति मडाप्रयोगे तर्पयि
त्वा॥ तथात्र त्रयोदशसु अग्निषु क्रमात्तदध्यायदेवतावाहनं संपू

ऽयमतिश्लोकमोंप्रथमाध्याय देवतायैनमः स्वाहेतिमंत्रेणपाय
सेनजुहुयात्। प्रत्यहंयावत्प्रयोगसमाप्तिस्त्रयोदशब्राह्मणास्सु
वासिनीकुमार्यएकोऽनुपनीतोऽष्टवर्षएकउपनीतश्चभोज
नीयः परार्थप्रयोगैतुसत्याः संतुयुज्यमानस्यकामाइतिप्रति
श्लोकंप्रत्यध्यायंवापठेत्॥ इदंसर्वंपरार्थप्रयोगेबोध्यं॥ अत्र
त्रयोदशपात्रेषुत्रयोदशदीपाइत्येकःत्नमः पक्षः एकपात्रेत्रयो
दशदीपाइतिमध्यमः पक्षः एकस्मिन्नेवदीपेत्रयोदशदीपाइ
त्यधमः पक्षः विधिर्दीपेषुकृतपुंजेषुजलपात्रेषुअग्निषुकु

मारीभुवाकार्यइत्युपदेशः॥ अथप्रयोगांतराणिकात्यायनीतंत्रो
क्तानि॥ प्रतिश्लोकमाद्यंतयोःसप्रणवंजपेसिद्धिः॥१॥ सप्रणवम
नुलोमव्याहृतित्रयमादौअंतेविलोमंतदित्येवंप्रतिश्लोकंजप्त्वा
शताहुत्यापापाग्नेर्नाशोशीघ्रंसिद्धिः२ प्रतिश्लोकमादौजातवेदसेइत्यृ
चंपठेत्सर्वकामसिद्धिः॥३॥ अपमृत्युवारणायादौअंतेचशतंत्र्यं
बकमंत्रंजपेत्॥४॥ प्रतिश्लोकंतन्मंत्रंजपइत्यन्यत्र५ प्रतिश्लोकंश
रणागतदीनार्त्तश्लोकंपठेत्सर्वकार्यसिद्धिः॥६॥ प्रतिश्लोकंकरोतु ७
सानःशुभहेतुरित्यर्द्धंपठेत्सर्वकामावाप्तिः॥७॥ त्वामीष्टवरप्र

ह्रोएवंदेव्यावरंलब्ध्वेतिप्रतिश्लोकंपठेत ॥८॥ सर्वापन्निवारणार्थं
प्रतिश्लोकंदुर्गेस्मृतेतिपठेत ॥९॥ अस्यकेवलस्यापिश्लोकस्यका
र्यानुसारेणलक्षमयुतंसहस्रंशतंवाजपः ॥१०॥ सर्वाबाधेलस्य
लक्षजपेश्लोकोक्तंफलं ॥११॥ इत्थंयदायदाबाधेतिश्लोकस्यलक्ष
जपेमहामारीशांतिः ॥१२॥ ततोवव्रेनृपोराज्यमितिमंत्रस्यलक्ष
जपेपुनःस्वराज्यलाभः ॥१३॥ हिनस्तिदैत्यतेजांसिइत्यनेनसदी
पबलिदानेघंटावादनेचबालग्रहशांतिः ॥१४॥ आद्यादष्टन्निमनुलो
मेनत्रयोदशाध्यायान्पठित्वाततोविपरीतक्रमेणद्वितीयांतलापु

नरनुलोमेनेसेवमावृत्तित्रयेउक्तेषुप्रकारेषुशीघ्रंकार्यसिद्धिः॥
२५॥सर्वापन्निवारणायदुर्गेस्मृतेत्यर्द्धंतनोयदंतिंयच्चदूरकेइत्यु
र्द्धंतदंतेदारिद्र्यदुःखेत्यर्द्धंएवंकार्यानुसारेणलक्षमयुतंसहस्रंश
तंवाजपः॥२६॥कांसोस्मीत्यूर्द्धंप्रतिश्लोकंपाठेलक्ष्मीप्राप्तिः॥२७॥मा
रणार्थमेवमुक्तासमुत्सयेतिप्रतिश्लोकंपठित्वामारणोक्ताहुतिभिः
फलसिद्धिः॥२८॥ज्ञानिनामपिचेतांसीतिश्लोकजपमात्रेणसद्योमो
हनमित्यनुभवसिद्धं॥प्रतिश्लोकंतत्श्लोकपाठेवश्यं॥२९॥रोगान
शेषानितिश्लोकस्यप्रतिश्लोकपाठेसकलरोगनाशः॥३०॥नम

भरूपेपिसः इत्यक्त्का साभगवती ॥ गंभीरेति श्लोकस्य प्रतिश्लोकं पा
ठे पृथक्‌रूपे वा विद्याप्राप्तिः ॥२१॥ भगवत्याकृतं सर्वं इत्यादिश्लोकाद
शीत्तरशताक्षरमंत्रः सर्वकामदः सर्वापन्निवारणश्च ॥२२॥ देविप्र
पन्नार्तिहरे प्रसीद इति श्लोकस्य यथाकार्यं लक्षायुतसहस्रशतान्य
तमे प्रतिश्लोकपाठे सर्वापन्निवृत्तिः सर्वकामावाप्तिश्च ॥२३॥ एषुप्र
योगेषु प्रतिश्लोकं दीपाग्रे केवलमेव वा नमस्कारकरणेन शीघ्रंसि
द्धिः ॥२४॥ प्रतिश्लोककामबीजसंपुटीतस्यैकचत्वारिंशद्दिनं त्रि
रावृत्तौ सर्वकामसिद्धिः ॥२५॥ एकविंशतिदिनपर्यंतं भक्तरीसादश

हुतौवशीकरणं॥२६॥मायाबीजसंपुटितस्यफट्पल्लवसहितस्य
सप्तदिनपर्यंतंत्रयोदशाहुतौउच्चाटनसिद्धिः॥२७॥ताद्दशस्यैवदि
नचतुष्टयमेकादशाहुतौसर्वोपद्रवनाशनं॥२८॥एकोनपंचाशद्दि
नपर्यंतंप्रतिश्लोकंत्रिबीजसंपुटितस्यपंचदशाहुतौलक्ष्मीप्राप्तिः॥२
९॥प्रतिश्लोकमैंबीजसंपुटितस्यशताहुत्याविद्याप्राप्तिः॥३०॥अथै
तत्स्तोत्रपाठेडामरकल्पोक्तोनवार्णसंपुटीकरणप्रयोगः॥तत्रादौन
त्कारः॥ऐंबीजमाद्यंकुसमानदीप्तिंह्रींसूर्यतेजोद्युतिमद्द्वितीयंक्लीं
मूर्त्तिर्वैश्वानरअन्यरूपंतृतीयमानंदसुखायचिंत्यं॥चामुंडजांबु

नरकांतिचूर्यतिं पंचमंरक्ततरं प्रकल्प्यं।३।षष्ठमुग्रौ(श्री)निर्हरंसुशीलं
येसप्तमंरक्तरतं रिपुघ्नं।४।विपांडुरं त्वष्टममादिसिद्धं चेत्सवर्णंन ५
वमंविशालं॥ऐं ह्रीं क्लीं चामुंडायैविच्चे।इतिनवाक्षरीमंत्रः नानिमा
त्रैजलेसहस्त्ररूपात्कवितासिद्धिः।अयुतजपेराजबंधनसंकटा
द्विन्योमोक्षः।अस्मिन्नवाक्षरेमंत्रेमहालक्ष्मीर्व्यवस्थिता।तस्मा
त्सुसिद्धः सर्वेषांसर्वदिक्षुप्रदीपकः॥अनेनात्रसिद्धादिविचारो
नास्तीतिज्ञापितं॥नवाक्षरस्यऋषयोब्रह्मविष्णुमहेश्वराः छंदां
स्युक्तानिमुनिभिर्गायत्र्युष्णिगनुष्टुभः देव्यः प्रोक्ताःमहापूर्वाका

श्रीलक्ष्मीःसरस्वती। नंदाशाकंभरीभीमाःशक्तयोस्यमनोःस्मृताः।
स्यान्नक्षदंतिकादुर्गाभ्रामर्योबीजसंचयः। अग्निर्वायुर्भगास्तत्वंफलं
वेदत्रयोद्भवं। नगःसूर्यःसर्वाभीष्टप्रसिध्यर्थेविनियोगउदाहृतः।
ऋषिछंदोदेवतानिशिरोमुखहृदिन्यसेत्।। शक्तिबीजानिस्तनयो
स्तत्वानिहृदयेपुनः मंत्राणांपल्लवोवासोमंत्राणांप्रणवःशिरः।शि
रःपल्लवसंयुक्तोमंत्रःकामदुघोभवेत्।। पल्लवास्व।। नमोंतःशांतिके
पुष्टौप्रणिपातेचकीर्तिताः।। वश्याकर्षणक्षोभेमेपुस्वाहांतःसिद्धि
दायकः। वौषट्पल्लवसंयुक्तोमंत्रःउच्चाटादिसाधकः। हुंकारपल्लवोपे १०

तोमारणेब्रास्मणं विना। यंत्रं नंजन कार्येषु सुघोरन्नय नाशनो व
षंडंतः प्रकल्पस्तु यद्वा बाधा विनाशकः॥ उच्चाटने तु संप्रोक्तो मंत्रः
फट् पध्व वान्वितः॥ एते पध्व वास्तु तत्कर्मणि चंडीपाठेपि प्रोक्तान
दोयोज्याः॥ न्यासहीनो न वेन्मूको मृतः स्याच्छिरसो विना। अप
ध्व वस्तु नग्नः स्यात्सुप्तः स्यादासनं विना। गुरुं विना दृष्पा मंत्रः प्र
यज्ञापस्तु शून्यकः। निर्वीर्यो दुष्टदत्तः स्यान्नान्यवीजस्तु कीलि
तः दुष्टदत्तः दुष्टायदत्त इत्यर्थः देवछंद ऋषिहीनो यः स उप्रोक्तो
जंगमः॥ मूकादयो मां त्रं वर्ज्याः वैदिके मंत्रे त्र पध्व वादि विचारः॥ श्री

चंडिकायैइत्यनेनास्यमंत्रस्यस्तोत्रस्यचषडंगकरन्यासो।नवबीजा
त्मकसमस्तमंत्रेणचषडंगः अस्त्रंसर्वदिक्षुबोध्यं।नवबीजमंत्रांतेचं
डिकातृप्यतामितिमंत्रेणतर्प्पणं।एवंहोमादिष्वपिकल्प्यं।लिखेदष्टद
लंपद्मंकुंकुमागरुचंदनैः।पद्ममध्येलिखेच्चक्रंषट्कोणंचंडिकाम
यं।षट्कोणचक्रमध्यस्थमाद्यंबीजत्रयंन्यसेत्।तत्रमध्यबीजेम
हालक्ष्मी।वामेमहासरस्वती।दक्षेमहाकालीपूर्वादिषट्सुकोणे
षुबीजान्यन्यानिविन्यसेत्।।इदंपूजायंत्रं।।पद्मासनाद्यन्यतमम्मा
सनंतथासप्तशतीश्लोकैन्यासिः खड्गिनीशूलिनीत्यादिपञ्चश्लो 22

कपंचकं। आद्यं ह्ल्लतरंबीजं। ध्यात्वा सर्वांगिकेन्यसेत्। आद्यमे
मिति॥ स्थ्लेन पाहि नो देवी त्यादि श्लोकचतुष्टयं पठित्वा सूर्यसदृशं
द्वितीयं सर्वतोन्यसेत्॥ द्वितीयं ह्रीं इति॥ सर्वस्वरूपे इत्यादिश्लोका
नां पंचकं पुनः॥ पठित्वा स्फटिकाभासं॥ तृतीयं बीजं स्वतनौ न्यसेत्
॥ तृतीयं क्लीं इति॥ १॥ उक्तैरेव श्लोकैर्व्रतिद्वयेन षडंगन्यासोपि क
चिदुक्तः॥ ततः षडंगं कुर्वीत विनक्तैर्मूलवर्णकैः॥ एकेनैकेन चैकेन
चतुर्निर्युगलेन च॥ समस्तेन च मंत्रेण कुर्यादंगानि षट् सुधीः
॥ ततः॥ क्वचित्॥ एवं न्यासविधिं कृत्वा स्वष्टिमुद्रां विलोकयेत्। ततः

परिषिंचेदिति पूजार्थं द्रव्याणि नववीजतः ॥ ततः पृष्ठो द्भवां मुद्रां
दत्वास्त्रेणावगुंठयेत् । अर्घ्यपात्रं प्रतिष्ठाप्य पूरयेच्छुद्धवारिणा ॥
गंधपुष्पाक्षतांस्तत्र विन्यसेन्नृपनंदन । ध्यमत्वा सर्वाणि तीर्थानि
हस्तौ दत्वाभिमंत्रयेत् ॥ रक्षार्थं तस्य कर्तव्या चक्रमुद्रास्त्रसंयुता ।
अर्घ्योदकेन संस्कारं पूजाद्रव्यस्य पूर्ववत् । ततः त्रक्रयंत्रे पंचोपचा
रैः पूजामङ्गाकाव्यादि त्रिशक्तिध्यानं विज्ञाव्य ॥ एवं कृत्वा जपेल्लक्ष
चतुष्कं तद्दशांशतः । पायसान्नेन जुहुयाद्धुतैर्द्धे मरेतसि ॥ एतद्दे १२
वास्य पुरश्चरणं ॥ मार्कंडेयपुराणोक्तं नित्यं चंडीस्तवं पठेत् । पाठितं

मूलमंत्रस्यजपेनाप्नोतिवांछितं।शतमाद्यौशतंचांतेजपेन्मंत्रंनवार्णं
वं।चंडीसप्तशतीमध्येसंपुटोयमुदाहृतः।सकामःसंपुटोजाप्यो
निष्कामःसंपुटंविनेतिकचित्।उसप्तशत्याश्चरित्रेप्रथमेपद्मजो उ
मुनिः।छंदोगायत्र्युदितंमहाकालीतुदेवता।वाग्बीजं।पावकस्तत्त्वं।
धर्मार्थविनियोजनं।मध्यमेतुचरित्रेतुमुनिर्विष्णुरुदाहृतः।उ
ष्णिक्छंदोमहालक्ष्मीर्देवताबीजमुच्यते।वायुस्तत्त्वंधनप्राप्त्ये
विनियोगउदाहृतः।उत्तरस्यचरित्रस्यऋषिःशंकरईरितः।त्रि
ष्टुप्छंदोदेवतास्यमहापूर्वासरस्वती।कामोबीजंरविस्तत्त्वंकाम।

ध्येविनियोजनं।।कश्चित्तुसंपूर्णस्तोत्रस्यमार्कंडेयऋषिः।ब्रह्मविष्णु
महेश्वराऋषयः।।महाकालीमहालक्ष्मीमहासरस्वत्योदेवताः।गा
यत्र्युष्णिगनुष्टुभश्छंदांसि।ऐंह्रींक्लींबीजानि।चामुंडाशक्तिः।अग्नि
वायुसूर्यास्तत्वानि।सर्वाभीष्टसिध्यर्थेजपेविनियोगः।।एवंसंस्मृत्यक
ष्यादीन्ध्यात्वापूर्वोक्तमर्गतः।सार्धस्मृतिंपठेच्चंडीस्तवंस्पष्टपदाक्षरं।
समाप्तेतुमहालक्ष्मींध्यात्वाषडंगकंकृत्वाजपेदष्टशतंमूलंदेवता
येनिवेदयेत्।।आदावष्टोत्तरशतंजपः।।आश्विनस्यसितेपक्षेप्रारभ्या १३
स्तितिथिंसुधीः।अष्टम्यंतंजपेद्वह्नौदशांशंहोममाचरेत्।।अथ

कश्चमहादैत्योदुर्गाह्वोमपरायणः।कवचाकृतिमात्रेणमहेशेननि
पातितः॥ ॥इतिकात्यायनीतंत्रोक्तचंडीपूजाविधिःसमाप्तः॥श्री
शाकेसप्तदशशतैकत्रिंशप्रवर्त्तमानेविभवनाम्निसंवत्सरेउत्तराय
णेग्रीष्मर्तौज्येष्ठेमासिसितेपक्षेचतुर्थ्यांगुरुवारेणलिखितंदि
वेकृपनामकठक्कुरदेवात्मजशिवदेवेनशुभं। ॥श्रीरस्तु॥
व्यावहारिकसंवत् १८६५ वर्षेज्येष्ठशुक्लचतुर्थ्यांगुरुवासरेण॥
शुभमस्तुसर्वजगतः॥ ॥श्रीमंगलमस्तु॥ ॥श्री॥ ॥ १७